# Natya Shastra Chapter 22

# नाट्यशास्त्रम् अध्यायः २२

## Document Information

Text title : naaTyashaastra adhyaaya 22

File name : natya22.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : October 6, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 18, 2026

*sanskritdocuments.org*

# नाट्यशास्त्रम् अध्यायः २२

॥ श्रीरस्तु ॥

भरतमुनिप्रणीतं नाट्यशास्त्रम्
अथ द्वाविंशोऽध्यायः ।

सामान्याभिनयो नाम ज्ञेयो वागङ्गसत्त्वजः ।
तत्र कार्यः प्रयत्नस्तु नाट्यं सत्त्वे प्रतिष्ठितम् ॥ १॥

सत्त्वातिरिक्तोऽभिनयो ज्येष्ठ इत्यभिधीयते ।
समसत्त्वो भवेन्मध्यः सत्वहीनोऽधमः स्मृतः ॥ २॥

अव्यक्तरूपं सत्त्वं हि विज्ञेयं भावसंश्रयम् ।
यथास्थानरसोपेतं रोमाञ्चास्रादिभिर्गुणैः ॥ ३॥

अलङ्कारास्तु नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः ।
यौवनेऽभ्यधिकाः स्त्रीणा विकारा वक्त्रगात्रजाः ॥ ४॥

आदौ  त्रयोऽङ्गजस्तेषां दश स्वाभाविकाः परे ।
अयत्नजाः पुनः सप्त रसभावोपबृंहिताः ॥ ५॥

देहात्मकं भवेत्सत्त्वं सत्त्वाद्भावः समुत्थितः ।
भावात्समुत्थितो हावो हावाद्धेला समुत्थिता ॥ ६॥

हेला  हावश्च भावश्च परस्परसमुत्थिताः ।
सत्त्वभेदे भवन्त्येते शरीरे प्रकृतिस्थिताः ॥ ७॥

वागङ्गमुखरागैश्च सत्त्वेनाभिनयेन च ।
कवेरन्तर्गतं भावं भावयन्भाव उच्यते ॥ ८॥

[भावस्यातिकृतं सत्त्वं व्यतिरिक्तं स्वयोनिषु ।
नैकावस्थान्तरकृतं भावं तमिह निर्दिशेत्] ॥ ९॥

तत्राक्षिभ्रूविकाराढ्यः शृङ्गाराकारसूचकः ।

सग्रीवारेचको ज्ञेयो हावः स्थितसमुत्थितः ॥ १०॥

यो वै हावः स एवैषा शृङ्गाररससंभवा ।
समाख्याता बुधैर्हेला ललिताभिनयात्मिका ॥ ११॥

लीला विलासो विच्छित्तिर्विभ्रमः किलिकिञ्चितम् ।
मोट्टायितं कुट्टिमितं बिब्बोको ललितं तथा ॥ १२॥

विहृतं चेति विज्ञेया दश स्त्रीणां स्वभावजाः ।
पुनरेषां स्वरूपाणि प्रवक्ष्यामि पृथक्पृथक् ॥ १३॥

वागङ्गालङ्कारैः शिष्टैः प्रीतिप्रयोजितैर्मधुरैः ।
इष्टजनस्यानुकृतिर्लीला ज्ञेया प्रयोगज्ञैः ॥ १४॥

स्थानासनगमनानां हस्तभ्रूनेत्रकर्मणां चैव ।
उत्पद्यते विशेषो यः श्लिष्टः स तु विलासः स्यात् ॥ १५॥

माल्याच्छादनभूषण विलेपनानामनादरन्यासः ।
स्वल्पोऽपि परां शोभां जनयति यस्मात्तु विच्छितिः ॥ १६॥

विविधानामर्थानां वागङ्गाहार्यसत्त्वानाम् ।
मदरागहर्षजनितो व्यत्यासो विभ्रमो ज्ञेयः ॥ १७॥

स्मितरुदितहसितभयहर्षगर्वदुःखश्रमाभिलाषाणाम्।
सङ्करकरणं हर्षादसकृत् किलिकिञ्चितं ज्ञेयम् ॥ १८॥

इष्टजनस्य कथायां लीलाहेलादिदर्शने वापि ।
तद्भावभावनाकृतमुक्तं मोट्टायितं नाम ॥ १९॥

केशस्तनधरादिग्रहणादतिहर्षसंभ्रमोत्पन्नम् ।
कुट्टमितं विज्ञेअयं सुखमपि दुःखोपचारेण ॥ २०॥ ।

इष्टानां भावानां प्राप्तावभिमानगर्वसंभूतः ।
स्त्रीणामनादरकृतो बिब्बोको नाम विज्ञेयः ॥ २१॥

हस्तपादाङ्गविन्यासो भ्रूनेत्रोष्ठप्रयोजितः ।
सौकुमार्याद्भवेद्यस्तु ललितं तत्प्रकीर्तितम् ॥ २२॥

[करचरणाङ्गन्यासः सभ्रूनेत्रोष्ठसम्प्रयुक्तस्तु ।
सुकुमारविधानेन स्त्रीभिउरितीदं स्मृतं ललितम्] ॥ २३॥

वाक्यानां प्रीतियुक्तानां प्राप्तानां यदभाषणम् ।
व्याजात्स्वभावतो वापि विहृतं नाम तद्भवेत् ॥ २४॥

[प्राप्तानामपि वचसां क्रियते  यदभाषणं ह्रिया स्त्रीभिः ।
व्याजात्स्वभावतो वाप्येतत्समुदाहृतं विहृतम्] ॥२५॥

शोभा कान्तिश्च दीप्तिश्च तथा माधुर्यमेव च ।
धैर्यं प्रागल्भ्यमौदार्यमित्येते स्युरयत्नजाः ॥ २६॥

रूपयौवनलावण्यैरुपभोगोपबृंहितैः ।
अलङ्करणमङ्गानां शोभेति परिकीर्तिता ॥ २७॥

विज्ञेया च तथा कान्तिः शोभैवापूर्णमन्मथा ।
कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥ २८॥

सर्वावस्थाविशेषेषु दीप्तेषु ललितेषु च ।
अनुल्बणत्वं चेष्टाया माधुर्यमिति संज्ञितम् ॥ २९॥

चापलेनानुपहता सर्वार्थेष्वविकत्थना ।
स्वाभाविकी चित्तवृत्तिर्धैर्यमित्यभिधीयते ॥ ३०॥

प्रयोगनिस्साध्वसता प्रागल्भ्यं समुदाहृतम् ।
औदार्यं प्रश्रयः प्रोक्तः सर्वावस्थानुगो बुधैः ॥ ३१॥

सुकुमारे भवन्त्येते प्रयोगे ललितात्मिके ।
विलासललिते हित्वा दीप्तेऽप्येते भवन्ति हि ॥ ३२॥

शोभा विलासो माधुर्यं स्थैर्यं गाम्भीर्यमेव च ।
ललितौदार्यतेजांसि सत्त्वभेदास्तु पौरुषाः ॥ ३३॥

दाक्ष्यं शौर्यमथोत्साहो नीचार्थेषु जुगुप्सनम् ।
उत्तमैश्च गुणैः स्पर्धा यतः शोभेति सा स्मृता ॥ ३४॥

धीरसंचारिणी दृष्टिर्गतिर्गोवृषभाञ्चिता ।
स्मितपूर्वमथालापो विलास इति कीर्तितः ॥ ३५॥

अभ्यासत्करणानां तु श्लिष्टत्वं यत्र जायते ।
महत्स्वपि विकारेषु तन्माधुर्यमिति स्मृतम् ॥ ३६॥

धर्मार्थकामसंयुक्ताच्छुभाशुभसमुत्थितात् ।
व्यवसायादचलनं स्थैर्यमित्यभिसंज्ञितम् ॥ ३७॥

यस्य प्रभावादाकारा हर्षक्रोधभयादिषु ।
भावेषु नोपलक्ष्यन्ते तद्गाम्भीर्यमिति स्मृतम् ॥ ३८॥

अबुद्धिपूर्वकं यत्तु निर्विकारस्वभाजम् ।
शृङ्गाराकारचेष्टत्वं ललितं तदुदाहृतम् ॥ ३९॥

दानमभ्युपपत्तिश्च तथा च प्रियभाषणम् ।
स्वजने च परे वापि तदौदार्यं प्रकीर्तितम् ॥ ४०॥

अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् ।
प्राणत्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥ ४१॥

सत्त्वजोऽभिनयोः पूर्वं मया प्रोक्तओ द्विजोत्तमाः ।
शारीरं चाप्याभिनयं व्याख्यास्याम्यनुपूर्वशः ॥ ४२॥

षडात्मकस्तु शारीरो वाक्यं सूचाङ्कुरस्तथा ।
शाखा नाट्यायितं चैव निवृत्त्यङ्कुर एव च ॥ ४३॥

नानारसार्थयुक्तैर्वृत्तनिबन्धैः कृतः सचूर्णपदैः ।
प्राकृतसंस्कृतपाठो वाक्याभिनयो बुधैर्ज्ञेयः ॥ ४४॥

वाक्यर्थो वाक्यं वा सत्त्वाङ्गैः सूच्यते यदा पूर्वम् ।
पश्चाद्वाक्याभिनयः सूचेत्यभिसंज्ञिता सा तु ॥ ४५॥

हृदयस्थो निर्वचनैरङ्गाभिनयः कृतो निपुणसाध्यः ।
सूचैवोत्पत्तिकृतो विज्ञेयस्त्वङ्कुराभिनयः ॥ ४६॥

यत्तु शिरोमुखजङ्घोरुपाणिपादैर्यथाक्रमं क्रियते ।
शाखादर्शनमार्गः शाखाभिनयः स विज्ञेयः ॥ ४७॥

नाट्यायितमुपचारैर्यः क्रियतेऽभिनयसूचया नाट्ये ।
कालप्रकर्षहेतोः प्रवेशकैः संगमो यावत् ॥ ४८॥

स्थाने ध्रुवास्वभिनयो यः क्रियते हर्षशोकरोषाद्यैः ।
भावरससम्प्रयुक्तैर्ज्ञेयं नाट्यायितं तदपि ॥ ४९॥

यत्रान्योक्तं वाक्यं सूचाभिनयेन योजयेदन्यः ।
तत्संबन्धार्थकथं भवेन्निवृत्त्यङ्कुरः सोऽथ ॥ ५०॥

एतेषां तु भवेन्मार्गो यथाभावरसान्वितः ।

काव्यवस्तुषु निर्दिष्टो द्वादशाभिनयात्मकः ॥ ५१॥

आलापश्च  प्रलापश्च विलापः स्यात्तथैव च ।
अनुलापोऽथ संलापस्त्वपलापस्तथैव च ॥ ५२॥

सन्देशश्चातिदेशश्च निर्देशः स्यात्तथापरः ।
उपदेशोऽपदेशश्च व्यपदेशश्च कीर्तितः ॥ ५३॥

आभाषणं तु यद्वाक्यमालापो  नाम स स्मृतः ।
अनर्थकं वचो यत्तु प्रलापः स तु कीर्तितः ॥ ५४॥

करुणप्रभवो यस्तु विलापः स तु कीर्तितः ।
बहुशोऽभिहितं वाक्यमनुलाप इति स्मृतः ॥ ५५॥

उक्तिप्रत्युक्तिसंयुक्तः संलाप  इति कीर्तितः ।
पूर्वोक्तस्यान्यथावादो ह्यपलाप इति स्मृतः ॥ ५६॥

तदिदं वचनं ब्रूहीत्येष सन्देश उच्यते ।
यत्त्वयोक्तं मयोक्तं तत्सोऽतिदेश इति स्मृतः ॥ ५७॥

स एषोऽहं ब्रवीमीति निर्देश इति कीर्तितः ।
व्याजान्तरेण  कथनं व्यपदेश इहोच्यते ॥ ५८॥

इदं कुरु गृहाणेति ह्युपदेशः प्रकीर्तितः ।
अन्यार्थकथनं यत् स्यात् सोऽपदेशः प्रकीर्तितः ॥ ५९॥

एते मार्गास्तु विज्ञेयाः सर्वाभिनययोजकाः ।
सप्तप्रकारमेतेषां पुनर्वक्ष्यामि  लक्षणम् ॥ ६०॥

प्रत्यक्षश्च परोक्षश्च तथा कालकृतास्त्रयः ।
आत्मस्थश्च   परस्थश्च  प्रकाराः सप्त एव तु ॥ ६१॥

एषा ब्रवीमि नाहं भो वदामीति च यद्वचः ।
प्रत्यक्षश्च परोक्षश्च वर्तमानश्च तद्भवेत् ॥ ६२॥

अहं करोमि गच्छामि वदामि वचनं तव ।
आत्मस्थो वर्तमानश्च प्रत्यक्षश्चैव स स्मृतः ॥ ६३॥

करिष्यामि गमिष्यामि वदिष्यामीति यद्वचः ।
आत्मस्थश्च परोक्षश्च भविष्यत्काल एव च ॥ ६४॥

हता जिता च भग्नाश्च मया सर्वे द्विषद्गणाः ।
आत्मस्थश्च परोक्षश्च वृत्तकालश्च स स्मृतः ॥ ६५॥

[त्वया हत जिताश्चेति यो वदेन्नाट्यकर्मणि ।
परोक्षश्च परस्थश्च वृत्तकालस्तथैव च ॥ ६६॥

एष ब्रवीमि कुरुते गच्छतीत्यादि यद्वचः ।
परस्थो वर्तमानश्च (प्रत्यक्षश्च) भवेत्तथा ॥ ६७॥

स गच्छति करोतीति वचनं यदुताहृतम् ।
परस्थं वर्तमानं च परोक्षं चैव तद्भवेत् ॥ ६८॥

करिष्यन्ति गमिष्यन्ति वदिष्यन्तीति यद्वचः ।
परस्थमेष्यत्कालं च परोक्षं चैव तद्भवेत्] ॥ ६९॥

हस्तमन्तरतः कृत्वा यद्वदेन्नाट्यकर्मणि ।
आत्मस्थं हृदयस्थं च परोक्षं चैव तन्मतम् ॥ ७०॥

परेषामात्मनश्चैव कालस्य च विशेषणात् ।
सप्तप्रकारस्यास्यैव भेदा ज्ञेया अनेकधा ॥ ७१॥

एते  प्रयोगा विज्ञेया मार्गाभिनययोजिताः ।
एतेष्विह विनिष्पन्नो विविधोऽभिनयो  भवेत् ॥ ७२॥

शिरो हस्तकटीवक्षोजङ्घोरुकरणेषु तु ।
समः कर्मविभागो यः सामान्याभिनयस्तु सः ॥ ७३॥

ललितैर्हस्तसंचारस्तथा मृद्वङ्गचेष्टितैः ।
अभिनेयस्तु नाट्यज्ञै रसभावसमन्वितैः ॥ ७४॥

अनुद्धतमसंभ्रान्तमनाविद्धाङ्गचेष्टितम् ।
लयतालकलापातप्रमाणनियतात्मकम् ॥ ७५॥

सुविभक्तपदालापमनिष्ठुरमकाहलम् ।
यदीदृशं भवेन्नाट्यं ज्ञेयमाभ्यन्तरं तु तत् ॥ ७६॥

एतदेव विपर्यस्तं स्वच्छन्दगतिचेष्टितम् ।
अनिबद्धगीतवाद्यं नाट्यं बाह्यमिति स्मृतम् ॥ ७७॥

लक्षणाभ्यन्तरत्वाद्धि  तदाभ्यन्तरमिष्यते ।
शास्त्रबाह्यं भवेद्यत्तु तद्बाह्यमिति भण्यते ॥ ७८॥

अनेन लक्ष्यते यस्मात् प्रयोगः कर्म चैव हि ।
तस्माल्लक्षणमेतद्धि नाट्येऽस्मिन् सम्प्रयोजितम् ॥ ७९॥

अनाचार्योषिता ये च ये च शास्त्रबहिष्कृताः ।
बाह्यं प्रयुञ्जते ते तु अज्ञात्वाचार्यकीं क्रियाम् ॥ ८०॥

शब्दं स्पर्शं च रूपं च रसं गन्धं तथैव च ।
इन्द्रियानीइन्द्रियार्थांश्च भावैरभिनयेद्बुधः ॥ ८१॥

कृत्वा साचीकृतां दृष्टिं शिरः पार्श्वनतं तथा ।
तर्जनी कर्णदेशे च बुधः शब्दं विनिर्दिशेत् ॥ ८२॥

किञ्चिदाकुञ्चिते नेत्रे कृत्वा भ्रूक्षेपमेव च ।
तथांऽसगण्डयोः स्पर्शात् स्पर्शमेवं विनिर्दिशेत् ॥ ८३॥

कृत्वा पताकौ मूर्धस्थौ किंचित्प्रचलिताननः ।
निर्वर्णयन्त्या दृष्ट्या च रूपं त्वभिनयेद् बुधः ॥ ८४॥

किञ्चिदाकुञ्चिते नेत्रे कृत्वोत्फुल्लां च नासिकाम् ।
एकोच्छ्वासेन चेष्टौ तु रसगन्धौ  विनिर्दिशेत् ॥ ८५॥

पञ्चानामिन्द्रियार्थानां भावा ह्येतेऽनुभाविनः ।
श्रोत्रत्वङ्नेत्रजिह्वानां घ्राणस्य च तथैव हि ॥ ८६॥

इन्द्रियार्थाः समनसो भवन्ति ह्यनुभाविनः ।
न वेत्ति ह्यमनाः किंचिद्विषयं पञ्चधागतम् ॥ ८७॥

मनसस्त्रिविधो भावो विज्ञेयोऽभिनये बुधैः ।
इष्टस्तथा ह्यनिष्टश्च मध्यस्थश्च तथैव हि ॥ ८८॥

प्रह्लादनेन गात्रस्य तथा पुलकितेन च ।
वदनस्य विकासेन कुर्यादिष्टनिदर्शनम् ॥ ८९॥

इष्टे शब्दे तथा रूपे स्पर्शे गन्धे तथा रसे ।
इन्द्रियैर्मनसा प्राप्तैः सौमुख्यं सम्प्रदर्शयेत् ॥ ९०॥

परावृत्तेन शिरसा नेत्रनासाविकर्षणैः ।
चक्षुषश्चाप्रदानेन ह्यनिष्टमभिनिर्दिशेत् ॥ ९१॥

नातिहृष्टेन मनसा न चात्यर्थजुगुप्सया ।

मध्यस्थनैव भावेन मध्यस्थमभिनिर्दिशेत् ॥ ९२॥

तेनेदं तस्य वापीदं स एवं प्रकरोति वा ।
परोक्षाभिनयो यस्तु मध्यस्थ इति स स्मृतः ॥ ९३॥

आत्मानुभावी योऽर्थः स्यादात्मस्थ इति स स्मृतः ।
परार्थवर्णना यत्र परस्थः स तु संज्ञितः ॥ ९४॥

प्रायेण सर्वभावानां कामान्निष्पत्तिरिष्यते ।
स चेच्छागुणसम्पन्नो बहुधा परिकल्पितः ॥ ९५॥

धर्मकामोऽर्थकामश्च मोक्षकामस्तथैव च ।
स्त्रीपुंसयोस्तु योगो यः स तु काम इति स्मृतः ॥ ९६॥

सर्वस्यैव हि लोकस्य सुखदुःखनिबर्हणः ।
भूयिष्ठं दृष्यते कामः स सुखं व्यसनेष्वपि ॥ ९७॥

यः स्त्रीपुरुषसंयोगो रतिसंभोगकारकः ।
स शृङ्गार इति ज्ञेय उपचारकृतः शुभः ॥ ९८॥

भूयिष्ठमेव लोकोऽयं सुखमिच्छति सर्वदा ।
सुखस्य हि स्त्रियो मूलं नाना शीलाश्चा ताः पुनः ॥ ९९॥

देवदानवगन्धर्वरक्षोनागपतत्रिणाम् ।
पिशाचयक्षव्यालानां नरवानरहस्तिनाम् ॥ १००॥

मृगमीनोष्ट्रमकरखरसूकरवाजिनाम् ।
महीषाजगवादीनां तुल्यशीलाः स्त्रियः स्मृताः ॥ १०१॥

स्निग्धैरङ्गैरुपाङ्गैश्च स्थिरा मन्दनिमेषिणि ।
अरोगा दीप्त्युपेता च दानसत्त्वार्जवान्विता ॥ १०२॥

अल्पस्वेदा समरता स्वल्पभुक् सुरतप्रिया ।
गन्धपुष्परता हृद्या देवशीलाङ्गना स्मृता ॥ १०३॥

अधर्मशाठ्याभिरता स्थिरक्रोधातिनिष्ठुरा ।
मद्यमांसप्रिअया नित्यं कोपना चातिमानिनी ॥ १०४॥

चपला चातिलुब्धा च परुषा कलहप्रिया ।
ईर्ष्याशीला चलस्नेहा चासुरं शीलमाश्रिता ॥ १०५॥

क्रीडापरा चारुनेत्रा नखदन्तैः सुपुष्पितैः ।
स्वऽङ्गी च स्थिरभाषी च मन्दापत्या रतिप्रिया ॥ १०६॥

गीते वाद्ये च नृत्ते च रता हृष्टा मृजावती ।
गन्धर्वसत्त्वा विज्ञेया स्निग्धत्वक्केशलोचना ॥ १०७॥

बृहद्व्यायतसर्वाङ्गी रक्तविस्तीर्णलोचना ।
खररोमा दिवास्वप्ननिरतात्युच्चभाषिणी ॥ १०८॥

नखदन्तक्षतकरी क्रोधेर्ष्याकलहप्रिया ।
निशाविहारशीला च राक्षसं शीलमाश्रिता ॥ १०९॥

तीक्ष्णनासाग्रदशना सुतनुस्ताम्रलोचना ।
नीलोत्पलसवर्णा च स्वप्नशीलाऽतिकोपना ॥ ११०॥

तिर्यग्गतिश्चलारम्भा बहुश्वासातिमानिनी ।
गन्धमाल्यासवरतानागसत्त्वाऽङ्गना स्मृता ॥ १११॥

अत्यन्तव्यावृतास्या च तीक्ष्णशीला सरित्प्रिया ।
सुरासवक्षीररता बह्वपत्या फलप्रिया ॥ ११२॥

नित्यं श्वसनशीलाच तथोद्यानवनप्रिया ।
चपला बहुवाक्छीघ्रा शाकुनं सत्त्वमाश्रिता ॥ ११३॥

ऊनाधिकाङ्गुलिकरा रात्रौ निष्कुटचारिणि ।
बालोद्वेजनशीला च पिशुना क्लिष्टभाषिणि ॥ ११४॥

सुरते कुत्सिताचारा रोमशाङ्गी महास्वना ।
पिशाचसत्त्वा विज्ञेया मद्यमांसबलिप्रिया ॥ ११५॥

स्वप्नप्रस्वेदनाङ्गी च स्थिरशय्यासनप्रिया ।
मेधाविनी बुद्धिमती मद्यगन्धामिषप्रिया ॥ ११६॥

चिरदृष्टेषु हर्षं च कृतज्ञत्वादुपैति सा ।
अदीर्घशायिनी चैव यक्षशीलाऽङ्गना स्मृता ॥ ११७॥

तुल्यमानावमाना या परुषत्वक् खरस्वरा ।
शठानृतोद्धतकथा व्यालसत्त्वा च पिङ्गदृक् ॥ ११८॥

विभक्ताङ्गी कृतज्ञा च गुरुदेवद्विजप्रिया ।
धर्मकामार्थनिरता ह्यहङ्कारविवर्जिता ।

सुहृत्प्रिया सुशीला च मानुषं सत्त्वमाश्रिता ॥ १२० ॥

संहताल्पतनुर्हृष्टा पिङ्गरोमा छलप्रिया ।
प्रगल्भा चपला तीक्ष्णा वृक्षारामवनप्रिया ॥ १२१ ॥

स्वल्पमप्युपकारं तु नित्यं  या बहुमन्यते ।
प्रसह्यरतिशीला च वानरं सत्त्वमाश्रिता ॥ १२२ ॥

महाहनुर्ललाटा च शरीरोपचयान्विता ।
पिङ्गाक्षी रोमशाङ्गी च गन्धमाल्यासवप्रिया ॥ १२३ ॥

कोपना स्थिरचित्ता  च जलोद्यानवनप्रिया ।
मधुराभिरता चैव हस्तिसत्त्वा प्रकीर्तिता ॥ १२४ ॥

स्वल्पोदरी भग्ननासा तनुजङ्घा  वनप्रिया ।
चलवीस्तीर्णनयना चपला शीघ्रगामिनी ॥ १२५ ॥

दिवात्रासपरा नित्यं गीतवाद्यरतिप्रिया ।
निवासस्थिरचित्ता च मृगसत्त्वा प्रकीर्तिता ॥ १२६ ॥

दीर्घपीनोन्नतोरस्का चला नातिनिमेषिणी ।
बहुभृत्या बहुसुता मत्स्यसत्त्वा जलप्रिया ॥ १२७ ॥

लम्बोष्ठी स्वेदबहुला किञ्चिद्विकटगामिनी ।
कृशोदरी पुष्पफललवणाम्लकटुप्रिया ॥ १२८ ॥

उद्बन्धकटिपार्श्वा च खरनिष्ठुरभाषिणी ।
अत्युन्नतकटीग्रीवा उष्ट्रसत्त्वाऽटवीप्रिया ॥ १२९ ॥

स्थूलशीर्षाञ्चितग्रीवा दारितास्या महस्वना ।
ज्ञेया मकरसत्त्वा च क्रूरा मत्स्यगुणैर्युता ॥ १३० ॥

स्थूलजिह्वोष्ठदशना रूक्षत्वक्कटुभाषिणी ।
रतियुद्धकरी धृष्टा नखदन्तक्षतप्रिया ॥ १३१ ॥

सपत्नीद्वेषिणी दक्षा चपला शीघ्रगामिनी ।
सरोगा बह्वपत्या च खरसत्त्वा प्रकीर्तिता ॥ १३२ ॥

दीर्घपृष्ठोदरमुखी रोमशाली बलान्विता ।
सुसंक्षिप्तललाटा च कन्दमूलफलप्रिया ॥ १३३ ॥

कृष्णा दंष्टोत्कटमुखी ह्रस्वोदरशिरोरुहा ।
हीनाचारा बह्वपत्या सौकरं सत्त्वमाश्रिता ॥ १३४॥

स्थिरा विभक्तपार्श्वोरुकटीपृष्ठशिरोधरा ।
सुभगा दानशीला च ऋजुस्थूलशिरोरुहा ॥ १३५॥

कृशा चञ्चलचित्ता च स्निग्धवाक्शीघ्रगामिनी ।
कामक्रोधपरा चैव हयसत्त्वाङ्गना स्मृता ॥ १३६।
स्थूलपृष्ठाक्षिदशना तनुपार्श्वोदरा स्थिरा ।
हरिरोमाञ्चिता रौद्री लोकद्विष्टा रतिप्रिया ॥ १३७॥।

किञ्चिदुन्नतवक्त्रा च जलक्रीडावनप्रिया ।
बृहल्ललाटा सुश्रोणी माहिषं सत्त्वमाश्रिता ॥ १३८॥

कृशा तनुभुजोरस्का निष्टब्धस्थिरलोचना ।
संक्षिप्तपाणिपादा च सूक्ष्मरोमसमाचिता ॥ १३९॥

भयशीला जलोद्विग्ना बह्वपत्या वनप्रिया ।
चञ्चला शीघ्रगमना ह्यजसत्त्वाऽङ्गना स्मृता ॥ १४०॥

उद्बन्धगात्रनयना विजृम्भणपरायणा ।
दीर्घाल्पवदना स्वल्पपाणिपादविभूषिता ॥ १४१॥

उच्चःस्वना स्वल्पनिद्रा क्रोधना सुकृतप्रिया ।
हीनाचारा कृतज्ञा च श्वशीला परिकीर्तिता ॥ १४२॥

पृथुपीनून्नतश्रोणी तनुजङ्घा सुहृत्प्रिया ।
संक्षिप्तपाणिपादा च दृढारम्भा प्रजाहिता ॥ १४३॥

पितृदेवार्चनरता सत्यशौचगुरुप्रिया ।
स्थिरा परिक्लेशसहा गवां सत्त्वं समाश्रिता ॥ १४४॥

नानाशीलाः स्त्रियो ज्ञेयाः स्वं स्वं सत्त्वं समाश्रिताः ।
विज्ञाय च यथासत्त्वमुपसेवेत ताः पुनः ॥ १४५॥

उपचारो यथासत्त्वं स्त्रीणामल्पोऽपि हर्षदः ।
महानप्यन्यथायुक्तो नैव तुष्टिकरो भवेत् ॥ १४६॥

यथा सम्प्रार्थितावाप्त्या रतिः समुपजायते ।
स्त्रीपुंसयोश्च रत्यर्थमुपचारो विधीयते ॥ १४७॥

धर्मार्थं हि तपश्चर्या सुखार्थं धर्म इष्यते ।
सुखस्य मूलं प्रमदास्तासु सम्भोग इष्यते ॥ १४८॥

कामोपभागो द्विविधो नाट्यधर्मेऽभिधीयते ।
बाह्याभ्यन्तरतश्चैव नारीपुरुषसंश्रयः ॥ १४९॥

आभ्यन्तरः पार्थिवानां स च कार्यस्तु नाटके ।
बाह्यो वेश्यागतश्चैव स च प्रकरणे भवेत् ॥ १५०॥

तत्र राजोपभोगं तु व्याख्यास्याम्यनुपूर्वशः ।
उपचारविधिं सम्यक् कामतन्त्रसमुत्थितम् ॥ १५१॥

त्रिविधा प्रकृतिः स्त्रीणां नानासत्त्वसमुद्भवा ।
बाह्या चाभ्यन्तरा चैव स्याद्बाह्याभ्यन्तरापरा ॥ १५२॥

कुलीनाभ्यन्तरा ज्ञेया बाह्या वेश्याङ्गना स्मृता ।
कृतशौचा तु या नारी सा बाह्याभ्यन्तरा स्मृता ॥ १५३॥

अन्तःपुरोपचारे तु कुलजा कन्यकापि वा ।
न हि राजोपचारे तु बाह्यस्त्रीभोग इष्यते ॥ १५४॥

आभ्यन्तरो भवेद्राज्ञो  बाह्यो बाह्यजनस्य च ।
दिव्यवेशाङ्गनानां हि राज्ञां भवति सङ्गमः ॥ १५५॥

कुलजाकामितं यच्च तज्ज्ञेयं कन्यकास्वपि ।
या  चापि वेश्या साप्यत्र यथैव कुलजा तथा ॥ १५६॥

इह कामसमुत्पत्तीर्नानाभावसमुद्भवा ।
स्त्रीणां वा पुरुषाणां वा उत्तमाधममध्यमा ॥ १५७॥

श्रवणाद्दर्शनाद्रूपादङ्गलीलाविचेष्टितैः ।
मधुरैश्च समालापैः कामः समुपजायते ॥ १५८॥

रूपगुणादिसमेतं कलादिविज्ञानयौवनोपेतम् ।
दृष्ट्वा पुरुषविशेषं नारी मदनातुरा भवति ॥ १५९॥

ततः कामयमानानां नृणां स्त्रीणामथापि च ।
कामाभावेङ्गितानीह तज्ज्ञः समुपलक्षयेत् ॥ १६०॥

ललिता चलपक्ष्मा च तथा च मुकुलेक्षणा ।
स्रस्तोत्तरपुटा चैव काम्या दृष्टिर्भवेदिह ॥ १६१॥

[वलितान्ता सलालित्यसंमितैर्व्यञ्जितैरस्तथा ।
दृष्टिः सा ललिता नाम स्त्रीणामर्धावलोकने ॥] १६१॥

ईष्त्संरक्तगण्डस्तु सस्वेदलवचित्रितः ।
प्रस्पन्दमानरोमाञ्चो मुखरागो भवेदिह ॥ १६३॥

काम्येनाङ्गविकारेण सकटाक्षनिरीक्षितैः ।
तथाभरणसंस्पर्शैः कर्णकण्डुयनैरपि ॥ १६४॥

अङ्गुष्ठाग्रविलिखनैः स्तननाभिप्रदर्शनैः ।
नखनिस्तोदनाच्चैव केशसंयमनादपि ॥ १६५॥

वेश्यामेवंविधैर्भावैर्लक्षयेन्मदनातुराम् ।
कुलजायास्तथा चैव प्रवक्ष्यामीङ्गितानि तु ॥ १६६॥

प्रहसन्तीव नेत्राभ्यां प्रततं च निरीक्षते ।
स्मयते सा निगूढं च वाचं चाधोमुखी वदेत् ॥ १६७॥

स्मितोत्तरा मन्दवाक्या स्वेदाकारनिगूहनी ।
प्रस्पन्दिताधरा चैव चकिता च कुलाङ्गना ॥ १६८॥

एवंविधैः कामलिङ्गैरप्राप्तसुरतोत्सवा ।
दशस्थानगतं कामं नानाभावैः प्रदर्शयेत् ॥ १६९॥

प्रथमे त्वभिलाषः स्याद् द्वितीये चिन्तनं भवेत् ।
अनुस्मृतिस्तृतीये तु चतुर्थे गुणकीर्तनम् ॥ १७०॥

उद्वेगः पञ्चमे प्रोक्तो विलापः षष्ठ उच्यते ।
उन्मादः सप्तमे ज्ञेयो भवेद्व्याधिस्तथाष्टमे ॥ १७१॥

नवमे जडता चैव दशमे मरणं भवेत् ।
स्त्रीपुंसयोरेष विधिर्लक्षणं च निबोधत ॥ १७२॥

व्यवसायात्समारब्धः संकल्पेच्छासमुद्भवः ।
समागमोपायकृतः सोऽभिलाषः प्रकीर्तितः ॥ १७३॥

निर्याति विशति च मुहुः करोति चाकारमेव मदनस्य ।
तिष्ठति च दर्शनपथे प्रथमस्थाने स्थिता कामे ॥ १७४॥

केनोपायेन सम्प्राप्तिः कथं वासौ भवेन्मम ।

दूतीनिवेदितैर्भावैरिति चिन्तां निदर्शयेत् ॥ १७५॥

आकेकरार्धविप्रेक्षितानि वलयरशनापरामर्शः ।
नीवीनाभ्याः संस्पर्शनं च कार्यं द्वितीये तु ॥ १७६॥

सुमुहुर्मुहुर्निःश्वसितैर्मनोरथविचिन्तनैः ।
प्रद्वेषाच्चान्यकार्याणामनुस्मृतिरुदाहृता ॥ १७७॥

नैवासने न शयने धृतिमुपलभते स्वकर्मणि विहस्ता ।
तच्चिन्तोपगतत्वात् तृतीयमेव प्रयुञ्जीत ॥ १७८॥

अङ्गप्रत्यङ्गलीलाभिर्वाक्चेष्टाहसितेक्षितैः ।
नास्त्यन्यः सदृशस्तेनेत्येतत् स्याद् गुणकीर्तनम् ॥ १७९॥

गुणकीर्तनोल्लुकसनैरश्रुस्वेदापमार्जनैश्चापि ।
दूत्यविरहविस्रम्भैरभिनययोगश्चतुर्थे तु ॥ १८०॥

आसने शयने चापि न तुष्यति न तिष्ठति ।
नित्यमेवोत्सुका च स्यादुद्वेगस्थानमाश्रिता ॥ १८१॥

चिन्तानिःश्वासखेदेन हृद्दाहाभिनयेन च ।
कुर्यात्तदेवमत्यन्तमुद्वेगाभिनयेन च ॥ १८२॥

इह स्थित इहासीन  इह  चोपगतो मया ।
इति तैस्तैर्विलपितैर्विलापं सम्प्रयोजयेत् ॥ १८३॥

उद्विग्नात्यर्थमौत्सुक्यादधृत्या च विलापिनी ।
ततस्ततश्च भ्रमति विलापस्थानमाश्रिता ॥ १८४॥

तत्संश्रितां कथां युङ्क्ते सर्वावस्थागतापि हि ।
पुंसः प्रद्वेष्टि चाप्यन्यानुन्मादः सम्प्रकीर्तितः ॥ १८५॥

तिष्ठत्यनिमिषदृष्टिर्दीर्घं निःश्वसिति गच्छति ध्यानम् ।
रोदिति विहारकाले नाट्यमिदं स्यात्तथोन्मादे ॥ १८६॥

सामदानार्थसंभोगैः काम्यैः सम्प्रेषणैरपि ।
सर्वैर्निराकृतैः पश्चाद् व्याधिः समुपजायते ॥ १८७॥

मुह्यति हृदयं क्वापि प्रयाति शिरसश्च वेदना तीव्रा ।
न धृतिं चाप्युपलभते ह्यष्टममेवं प्रयुञ्जीत ॥ १८८॥

पृष्टा न किञ्चित् प्रब्रते न शृणोति न पश्यति ।
हाकष्टवाक्या तूष्णीका जडतायां गतस्मृतिः ॥ १८९॥

अकाण्डे दत्तहुंकारा तथा प्रशिथिलाङ्गिका ।
श्वासग्रस्तानना चैव जडताभिनये भवेत् ॥ १९०॥

सर्वैः कृतैः प्रतीकारैर्यदी नास्ति समागमः ।
कामाग्निना प्रदीप्ताया जायते मरणं ततः ॥ १९१॥

एवं स्थानानि कार्याणि कामतन्त्रं समीक्ष्य तु ।
अप्राप्तौ यानि कामस्य वर्जयित्वा तु नैधनम् ॥ १९२॥

विविधैः पुरुषोऽप्येवं विप्रलम्भसमुद्भवैः ।
भावैरेतानि कामस्य नानारूपाणि योजयेत्। ॥ १९३॥

एवं कामयमानानां स्त्रीणा नृणामथापि वा ।
सामान्यगुणयोगेन युञ्जीताभिनयं बुधः ॥ १९४॥

चिन्तानिःश्वासखेदेन हृद्दाहाभिनयेन च ।
तथानुगमनाच्चापि तथैवाध्वनिरीक्षणात् ॥ १९५॥

आकाशवीक्षणाच्चापि तथा दीनप्रभाषणात् ।
स्पर्शनान्मोटनाच्चापि तथा सापाश्रयाश्रयात् ॥ १९६॥

एभिर्नानाश्रयोत्पन्नैर्विप्रलम्भसमुद्भवैः ।
कामस्थानानि सर्वाणि भूयिष्ठं सम्प्रयोजयेत् ॥ १९७॥

स्रजो भूषणगन्धांश्च गृहाण्युपवनानि च ।
कामाग्निना दह्यमानः शीतलानि निषेवते ॥ १९८॥

प्रदह्यमानः कामार्तो बहुस्थानसमर्दितः ।
प्रेषयेत्कामतो दूतीमात्मावस्थाप्रदर्शिनीम् ॥१९९॥

सन्देशं चैव दूत्यास्तु प्रदद्यान्मदनाश्रयम् ।
तस्येयं समवस्थेति कथयेद्विनयेन सा ॥ २००॥

अथावेदितभावार्थो रत्युपायं विचिन्तयेत् ।
अयं विधिर्विधानज्ञैः कार्यः प्रच्छन्नकामिते ॥ २०१॥

विधिं राजोपचारस्य पुनर्वक्ष्यामि तत्त्वतः ।
अभ्यन्तरगतं सम्यक् कामतन्त्रसमुत्थितम् ॥ २०२॥

सुखदुःखकृतान् भावान् नानाशीलसमुत्थितान् ।
यान्यान् प्रकुरुते राजा तान्स्तान् लोकानुवर्तते ॥ २०३॥

न दुर्लभाः पार्थिवानां स्त्र्यर्थमाज्ञाकृताः गुणाः ।
दाक्षिण्यात्तु समुद्भूतः कामो रतिकरो भवेत् ॥ २०४॥

बहुमानेन देवीनां वल्लभानां भयेन च ।
प्रच्छन्नकामितं राज्ञा कार्यं परिजनं प्रति ॥ २०५॥

यद्यप्यस्ति नरेन्द्राणां कामतन्त्रमनेकधा ।
प्रच्छन्नाकामितं यत्तु तद्वै रतिकरं भवेत् ॥ २०६॥

यद्वामाभिनिवेशित्वं यतश्च विनिवार्यते ।
दुर्लभत्वं च यन्नार्याः सा कामस्य परा रतिः ॥ २०७॥

राज्ञामन्तःपुरजने दिवासम्भोग इष्यते ।
वासोअपचारो यश्चैअषां स रात्रौ परिकीर्तितः ॥ २०८॥

परिपाट्यां फलार्थे वा नवे प्रसव एव वा ।
दुःखे चैव प्रमोदे च षडेते वासकाः स्मृताः ॥ २०९॥

उचिते वासके स्त्रीनामृतुकालेऽपि वा  नृपैः ।
प्रेष्याणामथवेष्टानां कार्यं चैवोपसर्पणम् ॥ २१०॥

तत्र वासकसज्जा च विरहोत्कण्ठितापि वा ।
स्वाधीनभर्तृका चापि कलहान्तरितापि वा ॥ २११॥

खण्डिता विप्रलब्धा वा तथा प्रोषितभर्तृका ।
तथाभिसारिका चैव ज्ञेयास्त्वष्टौ तु नयिकाः ॥ २१२॥

उचिते वासकए या तु रतिसंभोगलालसा ।
मण्डनं कुरुते हृष्टा सा वै वासकसज्जिका ॥ २१३॥

अनेककार्यव्यासङ्गाद्यस्या नागच्छति प्रियः ।
तदनागतदुःखार्ता विरहोत्कण्ठिता तु सा ॥ २१४॥

सुरतातिरसैर्बद्धो यस्याः पार्श्वे तु नायकः ।
सान्द्रामोदगुणप्राप्ता भवेत् स्वाधीनभर्तृका ॥ २१५॥

ईर्ष्याकलहनिष्क्रान्तो यस्या नागच्छति प्रियः ।

सामर्षवशसम्प्राप्ता कलहान्तरिता भवेत् ॥ २१६॥

व्यासङ्गादुचिते यस्या वासके नागतः प्रियः ।
तदनागमदुःखार्ता खण्डिता सा प्रकीर्तिता ॥ २१७॥

यस्या दूतीं प्रियः प्रेष्य दत्त्वा संकेतमेव वा ।
नागतः कारणेनेह विप्रलब्धा तु सा भवेत् ॥ २१८॥

नानाकार्याणि सन्धाय यस्या वै प्रोषितः प्रियः ।
सारूढालककेशान्ता भवेत् प्रोषितभर्तृका ॥ २१९॥

हित्वा लज्जां तु या श्लिष्टा मदेन मदनेन च ।
अभिसारयते कान्तं सा भवेदभिसारिका ॥ २२०॥

आस्ववस्थासु विज्ञेया नायिका नाटकाश्रया ।
एतासां चैव वक्ष्यामि कामतन्त्रमनेकधा ॥ २२१॥

चिन्तानिःश्वासखेदेन हृद्दाहाभिनयेन च ।
सखीभिः सह संलापैरात्मावस्थावलोकनैः ॥ २२२॥

ग्लानिदैन्याश्रुपातैश्च रोषस्यागमनेन च ।
निर्भूषणमृजात्वेन दुःखेन रुदितेन च ॥ २२३॥

खण्डिता विप्रलब्धा वा कलहान्तरितापि वा ।
तथा प्रोषितकान्ता च भावानेतान् प्रयोजयेत् ॥ २२४॥

विचित्रोज्ज्वलवेषा तु प्रमोदोद्योतितानना ।
उदीर्णशोभा च तथा कार्या स्वाधीनभर्तृका ॥ २२५॥

वेश्यायाः कुलजायायाश्च प्रेष्यायाश्च प्रयोक्तृभिः ।
एभिर्भावविशेषैस्तु कर्तव्यमभिसारणम् ॥ २२६॥

समदा मृदुचेष्टा च तथा परिजनावृता ।
नानाभरणचित्राङ्गी गच्छेद्वेश्याङ्गना शनैः ॥ २२७॥

संलीना स्वेषु गात्रेषु त्रस्ता विनमितानना ।
अवकुण्ठनसंविता हच्छेत्तु कुलजाङ्गना ॥ २२८॥

मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगतिसंचारा गच्छेत्प्रेष्या समुद्धतम् ॥ २२९॥

गत्वा सा चेद्यदा तत्र पश्येत्सुप्तं प्रियं तदा ।
अनेन तूपचारेण तस्य कुर्यात्प्रबोधनम् ॥ २३० ॥

अलङ्कारेण कुलजा वेश्या गन्धैस्तु शीतलैः ।
प्रेष्या तु वस्त्रव्यजनैः कुर्वीत प्रतिबोधनम् ॥ २३१ ॥

कुलाङ्गनानामेवायं नोक्तः कामाश्रयो विधिः ।
सर्वावस्थानुभाव्यं हि यस्माद्भवति नाटकम् ॥ २३२ ॥

नवकामप्रवृत्ताया क्रुद्धाया वा समागमे ।
सापदेशैरुपायैस्तु वासकं सम्प्रयोजयेत् ॥ २३३ ॥

नानालङ्करवस्त्राणि गन्धमाल्यानि चैव हि ।
प्रिययोजितभुक्तानि निषेवेत मुदान्वितः ॥ २३४ ॥

न तथा भवति मनुष्यो मदनवशः कामिनीमलभमानः ।
द्विगुणोपजातहर्षो भवति यथ सङ्गतः प्रियया ॥ २३५ ॥

विलासभावेङ्गितवाक्यलीलामाधुर्यविस्तारगुणोपपन्नः ।
परस्परप्रेमनिरीक्षितेन समागमः कामकृतस्तु कार्यः ॥ २३६ ॥

ततः प्रवृत्ते मदने उपचारसमुद्भवे ।
वासोपचारः कर्तव्यो नायकागमनं प्रति ॥ २३७ ॥

गन्धमाल्ये गृहीत्वा तु चूर्णवासस्तथैव च ।
आदर्शो लीलया गृह्यश्छन्दतो वा पुनः पुनः ॥ २३८ ॥

वासोपचारे नात्यर्थं भूषणग्रहणं भवेत् ।
रशनानूपुरप्रायं स्वनवच्च प्रशस्यते ॥ २३९ ॥

नाम्बरग्रहणं रङ्गे न स्नानं न विलेपनम् ।
नाञ्जनं नाङ्गरागश्च केशसंयमनं तथा ॥ १४० ॥

नाप्रावृत्ता नैकवस्त्रा  न रागमधरस्य तु ।
उत्तमा मध्यमा वापि कुर्वीत प्रमदा क्वचित् ॥ २४१ ॥

अधमानां भवेदेष सर्व एव विधिः सदा ।
कारणान्तरमासाद्य तस्मादपि न कारयेत् ॥ २४२ ॥

प्रेष्यादीनां च नारीणां नराणां वापि नाटके ।
भूषणग्रहणं कार्यं पुष्पग्रहणमेव च ॥ २४३ ॥

गृहीतमण्डना चापि प्रतीक्षेत प्रियागमम् ।
लीलया मण्डितं वेषं कुर्याद्यन्न विरुध्यते ॥ २४४॥

विधिवद्वासकं कुर्यान्नायिका  नायकागमे ।
प्रतीक्षमाणा च ततो नालिकाशब्दमादिशेत् ॥ २४५॥

श्रुत्वा तु नालिकाशब्दं  नायकागमविक्लवा ।
विषण्णा वेपमाना च गच्छेत्तोरणमेव च ॥ २४६॥

तोरणं वामहस्तेन कवाटं दक्षिणेन च ।
गृहीत्वा तोरणाश्लिष्टा सम्प्रतीक्षेत नायकम् ॥ २४७॥

शङ्कां चिन्तां भयं चैव प्रकुर्यात्तोरणाश्रिता ।
अदृष्ट्वा रमणं नारी विषण्णा च क्षणं भवेत् ॥ २४८॥

दीर्घं चैव विनिःश्वस्य नयनाम्बु निपातयेत् ।
सन्नं च हृदयं कृत्वा विसृजेतदङ्गमासने ॥ २४९॥

व्याक्षेपाद्विमृशेच्चापि नायकागमनं प्रति ।
तैस्तैर्विचारणोपायैः शुभाशुभसमुत्थितैः ॥ २५०॥

गुरुकार्येण मित्रैर्वा मन्त्रिणा राज्यचिन्तया ।
अनुबद्धः प्रियं किं नु वृतो वल्लभयापि वा ॥ २५१॥

उत्पातान्निर्दिशेच्चापि शुभाशुभसमुत्थितान् ।
निमितैरात्मसंस्थैस्तु स्फुरितैः स्पन्दिअतैस्तथा ॥ २५२॥

शोभनेषु तु कार्येषु निमित्तं वामतः स्त्रियाः ।
अनिष्टेष्वथ सर्वेषु निमित्तं दक्षिणं भवेत् ॥ २५३॥

सव्यं नेत्रं ललाटं च भ्रूनासोष्ठं तथैव च ।
उरुबाहुस्तनं चैव स्फुरेद्यदि समागमः ॥ २५४॥

एतेषमन्यथाभावे दुर्निमित्तं विनिर्दिशेत् ।
दर्शने दुर्निमित्तस्य मोहं गच्छेत्क्षणं ततः ॥ २५५॥

अनागमे नायकस्य कार्यो गण्डाश्रयः करः ।
भूषणे चाप्यवज्ञानं रोदनं च समाचरेत् ॥ २५६॥

अथ चेच्छोभनं तत्स्यान्निमित्तं नायकागमे ।

सूच्यो नायिकयासन्नो गन्धाघ्राणेन नायकः ॥ २५७॥

दृष्ट्वा चोत्थाय संहृष्टा प्रत्युद्गच्छेद्यथाविधि ।
ततः कान्तं निरीक्षेत प्रहर्षोत्फुल्ललोचना ॥ २५८॥

सखीस्कन्धार्पितकरा कृत्वा स्थानकमायतम् ।
दर्शयेत ततः कान्तं सचिह्नं सरसव्रणम् ॥ १५९॥

यदि स्यादपराद्धस्तु कृतैस्तैस्तैरुपक्रमैः ।
उपालम्भकृतैर्वाक्यैरुपालभ्यस्तु नायकः ॥ २६०॥

मानापमानसंमोहैरवहित्थभयक्रमैः ।
वचनस्य समुत्पत्तिः स्त्रीणामीर्ष्याकृता भवेत् ॥ २६१॥

विस्रंभस्नेहरागेषु सन्देहे प्रणये तथा ।
परितोषे च घर्षे च दाक्षिण्याक्षेपविभ्रमे ॥ २६२॥

धर्मार्थकामयोगेषु प्रच्छन्नवचनेषु च ।
हास्ये कुतूहले चैव संभ्रमे व्यसने तथा ॥ २६३॥

स्त्रीपुंसयोः क्रोधकृते पृथङ्मिश्रे तथापि वा ।
अनाभाष्योऽपि संभाष्यः प्रिय एभिस्तु कारणैः ॥ २६४॥

यत्र स्नेहो भवेत्तत्र हीर्ष्या मदनसंभवा ।
चतस्रो योनयस्तस्याः कीर्त्यमाना निबोधत ॥ २६५॥

वैमनस्यं व्यलीकं च विप्रियं मन्युरेव च ।
एतेषां सम्प्रवक्ष्यामि लक्षणानि यथाक्रमम् ॥ २६६॥

निद्राखेदालसगतिं सचिह्नं सरसव्रणम् ।
एवंविधं प्रियं दृष्ट्वा वैमनस्यं भवेत् स्त्रियाः ॥ २६७॥

निद्राभ्यसूयितावेक्षणेन रोषप्रकम्पमानाङ्ग्या ।
साध्विति सुष्ठ्विति वचनैः शोभत इत्येवमभिनेयम् ॥ २६८॥

बहुधा वार्यमाणोऽपि यस्तस्मिन्नेव दृश्यते ।
संघर्षमत्सरात्तत्र व्यलीकं जायते स्त्रियाः ॥ २६९॥

कृत्वोरसि वामकरं दक्षिणहस्तं तथा विधुन्वन्त्या ।
चरणविनिष्ठम्भेन च कार्योऽभिनयो व्यलीके तु ॥ २७०॥

जीवन्त्या त्वयि जीवामि दासोऽहं त्वं च मे प्रिया ।
उक्त्वैवं योऽन्यथा कुर्याद्विप्रियं तत्र जायते ॥ २७१॥

दूतीलेखप्रतिवचनभेदनैः क्रोधहसितरुदितैश्च ।
विप्रियकरणेऽभिनयः सशिरःकम्पैश्च कर्तव्यः ॥ २७२॥

प्रतिपक्षसकाशात्तु यः सौभाग्यविकत्थनः ।
उपसर्पेत् सचिन्हस्तु मन्युस्तत्रोपजायते ॥ २७३॥

वलयपरिवर्तनैरथ सुशिथलमुत्क्षेपेणेन रशनायाः ।
मन्युस्त्वभिनेतव्यः सशङ्कितं बाष्पपूर्णाक्ष्या ॥ २७४॥

दृष्ट्वा स्थितं प्रियतमं सशङ्कितं सापराधमतिलज्जम् ।
ईर्ष्यावचनसमुत्थैः खेदयितव्यो ह्युपालम्भैः ॥ २७५॥

न च निष्ठुरमभिभाष्यो न चाप्यतिक्रोधनस्तु परिहासः ।
बाष्पोन्मिश्रैर्वचनैरात्मोपन्याससंयुक्तैः ॥ २७६॥

मध्याङ्गुल्यङ्गुष्ठाग्रविच्च्यवात्पाणिनोरसि कृतेन ।
उद्वर्तितनेत्रतया प्रततैरभिवीक्षणैश्चापि ॥ २७७॥

कटिहस्तविवर्तनया विच्छिन्नतया तथाञ्जलेः करणात् ।
मूर्धभ्रमणनिहञ्चितनिपातसंश्लेअष्णाच्चापि ॥ २७८॥

अवहित्थवीक्षणाद्वा अङ्गुलिभङ्गेन तर्जनैललितैः ।
एभिर्भावविशेषैरनुनयनेष्वभिनयः कार्यः ॥ २७९॥

शोभसे साधु दृष्टोऽसि गच्छ त्वं किं विलम्बसे ।
मा मां स्प्राक्षीः प्रिया यत्र तत्र या ते हृदि स्थिता ॥ २८०॥

गच्छेत्युक्त्वा परावृत्य विनिवृत्तान्तरेण तु ।
केनचिद्वचनार्थेन प्रहर्षं योजयेत्पुनः ॥ २८१॥

रभसग्रहणाच्चापि हस्ते वस्त्रे च मूर्धनि ।
कार्यं प्रसादनं नार्या ह्यपराधं समीक्ष्य तु ॥ २८२॥

हस्ते वस्त्रेऽथ केशान्ते नार्याप्यथ गृहीतया ।
कान्तमेवोपसर्पन्त्या कर्तव्यं मोक्षणं शनैः ॥ २८३॥

गृहीतायाथ केशान्ते हस्ते वस्त्रेऽथवा पुनः ।
हुं मुञ्चेत्युपसर्पन्त्या वाच्यः स्पर्शालसं प्रियः ॥ २८४॥

पादाग्रस्थितया नार्या किंचित्कुट्टमितोत्कटम् ।
अश्वक्रान्तेन  कर्तव्यं केशानां मोक्षणं शनैः ॥ २८५॥

अमुच्यमाने केशान्ते संजातस्वेदलेशया ।
हं हु मुञ्चापसर्पेति वाच्यः स्पर्शालसाङ्गया ॥ २८६॥

गच्छेति रोषवाक्येन गत्वा प्रतिनिवृत्य च ।
केनचिद्वचनार्थेन वाच्यं यास्यसि नेति च ॥ २८७॥

विधूननेन हस्तेन हुंकारं सम्प्रयोजयेत् ।
स चावधूनने कार्यः शपथैर्व्याज एव च ॥ २८८॥

अक्ष्णोः संवरणे कार्यं पृष्ठतश्चोपगूहनम् ।
नार्यास्त्वपहृते वस्त्रे दीपच्छादनमेव च ॥ २८९॥

तावत् खेदयितव्यस्तु यावत्पादगतो भवेत् ।
ततश्चरणयोर्याते कुर्याद्दूतीनिरीक्षणम् ॥ २९०॥

उत्थाप्यालिङ्गयेच्चैव नायिका नायकं ततः ।
रतिभोगगता हृष्टा शयनाभिमुखी व्रजेत् ॥ २९१॥

एतद्गीतविधानेन सुकुमारेण योजयेत् ।
यदा शृङ्गारसंयुक्तं रतिसम्भोगकारणम् ॥ २९२॥

यदा चाकाशपुरुषपरस्थवचनाश्रयम् ।
भवेत्काव्यं तदा ह्येष कर्तव्योऽभिनयः स्त्रिया ॥ २९३॥

यदन्तपुरसम्बन्धं कार्यं भवति नाटके ।
शृङ्गाररससंयुक्तं तत्राप्येष विधिर्भवेत् ॥ २९४॥

न कार्यं शयनं रङ्गे नाट्यधर्मं विजानता ।
केनचिद्वचनार्थेन अङ्कच्छेदो विधीयते ॥ २९५॥

यद्वा शयीतार्थवशादेकाकी सहितोऽपि वा ।
चुम्बनालिङ्गनं चैव तथ गुह्यं च यद्भवेत् ॥ २९६॥

दन्तच्छेद्यं नखच्छेद्यं नीवीस्रंसनमेव च ।
स्तनान्तरविमर्दं च रङ्गमध्ये न कारयेत् ॥ २९७॥

भोजनं सलिलक्रीडा तथा लज्जाकरं च यत् ।

एवंविधं भवेद्यद्यत्तत्तद्रङ्गे न कारयेत् ॥ २९८॥

पितापुत्रस्नुषाश्वश्रूदृश्यं यस्मात्तु नाटकम् ।
तस्मादेतानि सर्वाणि वर्जनीयानि यत्नतः ॥ २९९॥

वाक्यैः सातिशयैः श्रव्यैर्मधुरैर्नातिनिष्ठुरैः ।
हितोपदेशसंयुक्तैस्तज्ज्ञः कुर्यात्तु नाटकम् ॥ ३००॥

एवमन्तःपुरकृतः कार्यस्त्वभिनयो बुधः ।
समागमेऽथ नारीणां वाच्यानि मदनाश्रये ॥ ३०१॥

प्रियेषु वचनानीह यानि तानि निबोधत ।
प्रिअयः कान्तो विनीतश्च नाथः स्वाम्यथ जीवितम् ॥ ३०२॥

नन्दनश्चेत्यभिप्रीते वचनानि भवन्ति हि ।
दुःशीलोऽथ दुराचारः शठो वामो विकत्थनः ॥ ३०३॥

निर्लज्जो निष्ठुरश्चैअव प्रियः क्रोधेऽभिधीयते ।
यो विप्रियं न कुरुते न चायुक्तं प्रभाषते ॥ ३०४॥

तथार्जवसमाचारः स प्रियस्त्वभिधीयते ।
अन्यनारीसमुद्भूतं चिह्नं यस्य न दृष्यते ॥ ३०५॥

अधरे वा शरीरे वा स कान्त इति भाष्यते ।
संक्रुद्धेऽपि हि यो नार्या नोत्तरं प्रतिपद्यते ॥ ३०६॥

परुषं वा न वदति विनीतः साऽभिधीयते ।
हितैषी रक्षणे शक्तो न मानी न  च मत्सरी ॥ ३०७॥

सर्वकार्येष्वसंमूढः स नाथ इति संज्ञितः ।
सामदानार्थसंभोगैस्तथा लालनपालनैः ॥ ३०८॥

नारीं निषेवते यस्तु स स्वामीत्यभिधीयते ।
नारीप्सितैरभिप्रायैर्निपुणं शयनक्रियाम् ॥ ३०९॥

करोति यस्तु संभोगे स जीवितमिति स्मृतः ।
कुलीनो धृतिमान्दक्षो दक्षिणो वाग्विशारदः ॥ ३१०॥

श्लाघनीयः सखीमध्ये नन्दनः सोऽभिधीयते ।
एते वचनविन्यासा रतिप्रीतिकराः स्मृताः ॥ ३११॥

तथा चाप्रीतिवाक्यानि गदतो मे निबोधत ।
निष्ठुरश्चाहिष्णुश्च मानि धृष्टो विकत्थनः ॥ ३१२॥

अनवस्थितचित्तश्च दुःशील इति स स्मृतः ।
ताडनं बन्धनं चापि यो विमृश्य समाचरेत् ॥ ३१३॥

तथा परुषवाक्यश्च दुराचारः स तन्यते ।
वाचैअव मधुरो यस्तु कर्मण नोपपादकः ॥ ३१४॥

योषितः किञ्चिदप्यर्थं स शठः परिभाष्यते ।
वार्यते यत्र यत्रार्थे तत्तदेव करोति यः ॥ ३१५॥

विपरीतनिवेशी च स वाम इति संज्ञितः ।
सरसव्रणचिह्नो यः स्त्रीसौभाग्यविकत्थनः ॥ ३१६॥

अतिमानी तथा स्तब्धो विकत्थन इति स्मृतः ।
वार्यमाणो दृढतरं यो नारीमुपसर्पति ॥ ३१७॥

सचिह्नाः सापराधश्च स निर्लज्ज इति स्मृतः ।
योऽपराद्धस्तु सहसा नारीं सेवितुमिच्छति ॥ ३१८॥

अप्रसादनबुद्धिश्च निष्ठुरः सोऽभिधीयते ।
एते वचनविन्यासाः प्रियाप्रियविभाषिताः ॥ ३१९॥

नर्तकीसंश्रिताः कार्या बहवोऽन्येऽपि नाटके ।
एष गीतविधाने तु सुकुमारे विधिर्भवेत् ॥ ३२०॥

शृङ्गाररससंभूतो रतिसंभोगखेदनः ।
यच्चैवाकाशपुरुषं परस्थवचनाश्रयम् ॥ ३२१॥

शृङ्गार एवं वाच्यं स्यात्तत्राप्येष क्रमो भवेत् ।
यद्वा पुरुसंबन्धं कार्यं भवति नाटके ॥ ३२२॥

शृङ्गाररससंयुक्तं तत्राप्येष क्रमो भवेत् ।
एवमन्तःपुरगतः प्रयोज्योऽभिनयो भवेत् ॥ ३२३॥

दिव्याङ्गनानां तु विधिं व्याख्यास्यम्यनुपूर्वशः ।
नित्यमेवोज्वलो वेषो नित्यं प्रमुदितं मनः ॥ ३२४॥

नित्यमेव सुखः कालो देवानां ललिताश्रयः ।
न चैर्ष्या नैव च क्रोधो नासूया न प्रसादनम् ॥ ३२५॥

दिव्यानां दृष्यते पुंसां शृङ्गारे योषितां तथा ।
ये भावा मानुषाणां स्युर्यदङ्गं यच्च चेष्टितम् ॥३२६॥

सर्वं तदेव कर्तव्यं दिव्यैर्मानुषसङ्गमे ।
यदा मानुषसंभोगो दिव्यानां योषितां भवत् ॥ ३२७॥

तदा सर्वाः प्रकर्तव्या ये भावा मानुषाश्रयाः ।
शापभ्रंशात्तु दिव्यानां तथा चापत्यलिप्सया ॥ ३२८॥

कार्यो मानुषसंयोगः शृङ्गाररससंश्रयः ।
पुष्पैर्भूषणजैः शब्दैरदृश्यापि प्रलोभयेत् ॥ ३२९॥

पुनः संदर्शनं दत्त्वा क्षणादन्तरिता भवेत् ।
वस्त्राभरणमाल्याद्यैर्लेखसम्प्रेषणैरपि ॥ ३३०॥

ईदृशैरुपचारैस्तु समुन्माद्यस्तु नायकः ।
उन्मादनात्समुद्भूतः कामो रतिकरो भवेत् ॥ ३३१॥

स्वभावोपगतो यस्तु नासावत्यर्थभाविकः ।
एवं राजोपचारो हि कर्तव्योऽभ्यन्तराश्रयः ॥ ३३२॥

बाह्यमप्युपचारं  तु प्रवक्ष्याम्यथ वैशिके ।

इति भारतीये नाट्यशास्त्रे सामान्याभिनयो नामाध्यायो द्वाविंशः ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

---

*Natya Shastra Chapter 22*

pdf was typeset on January 18, 2026

Please send corrections to *sanskrit@cheerful.com*